अपि च ।
"शुक्रश्चाथ हकारोऽंशः प्राणः सान्तः शिवो वियत् ।
अकुलो नकुलीशश्च हसः शून्यश्च हाकिनी ।
अनन्तो नकुली जीवः परमात्मा ललाटजः ॥"
इति बीजवर्णाभिधानम् ।
अपि च ।
"हकारो नकुलीशोऽपि हंसः प्राणोऽङ्कुशः प्रिये ।
महेशो नकुली चैव वराको गगनं रविः ।
लिङ्गं शून्यो महाशून्यः प्राणश्च परमेश्वरि ! ॥"
इति श्रीरुद्रयामले ८ पटले मन्त्राभिधानम् ॥

ह, व्य. (हन हिंसागत्योः + अन्येभ्योऽपीति डः ।) पादपूरणम् । इत्यमरः । ३ । ४ । ५ ॥ (यथा, रामायणे । १ । १ । ५८ ।
"पम्पातीरे हनुमता सङ्गतो वानरेण ह ॥")
सम्बोधनम् । विनिग्रहः । नियोगः । क्षेपः । कुत्सा । इति मेदिनीशब्दरत्नावल्यौ ॥

हं, [म्] व्य, रुषोक्तिः । अनुनयः । इति मेदिनी ॥

हः, पुं, शिवः । जलम् । शून्यम् । धारणम् । मङ्गलम् । गगनम् । नकुलीशः । रक्तम् । स्वर्गः । इति मेदिनी ॥ पापहरणम् । चन्द्रः । इति शब्दरत्नावली ॥ सकोपवारणः । शुष्कः । इत्येकाक्षरकोषः ॥

हंसः, पुं, (हन्ति सुन्दरं गच्छतीति । हन हिंसागत्योः + "वृतृवदिहनीति ।" उणा० ३ । ६२ । इति सः । ) पक्षिविशेषः । हाँस इति भाषा । तत्पर्य्यायः । श्वेतगरुत् २ चक्राङ्गः ३ मानसौकाः ४ । इत्यमरः । २।५।२३ ॥ कलकण्ठः ५ सितच्छदः ६ । इति जटाधरः ॥ सितपक्षः ७ मराकाकः ८ पुरुदंशकः ९ । इति शब्दरत्नावली ॥ धवलपक्षः १० मानसालयः ११ । इति राजनिर्घण्टः ॥ अस्य मांसगुणाः । वातहरत्वम् । वृष्यत्वम् । स्वर्य्यत्वम् । मांसबलप्रदत्वञ्च । इति राजवल्लभः ॥*॥
अपि च ।
"स्निग्धं हिमं गुरु वृष्यं मांसं जलपक्षिणान्तु वातघ्नम् ।
तेष्वपि च हंसमांसं वृष्यतमं तिमिरहरञ्च ॥"
इति राजनिर्घण्टः ॥
अपि च ।
"हंससारसकाचाक्षबकक्रौञ्चसरारिकाः ।
नन्दीमुखी सकादम्बा बलाकाद्याः प्लवाः स्मृताः ।
प्लवन्ते सलिले यस्मात् एते तस्मात् प्लवाः स्मृताः ॥"
काचाक्षः कपर्दिकाक्षो बृहद्बकः । क्रौञ्चः शरहिहङ्गः स्यात् । टेक इति लोके । शरारिका सिखु इति लोके ।
"स्थूला कठोरा ह्रस्ता च यस्याश्चञ्चुर्व्यवस्थिता ।
गुटिकाचञ्चुसट्याो ज्ञेया नन्दीमुखीति सा ॥"
कादम्बः करावा इति लोके । बला बगुली इति लोके ।
"प्लवाः पित्तहराः स्निग्धा मधुरा गुरवो हिमाः ।
वातश्लेष्मप्रदाश्चापि बलशुक्रकराः सराः ॥"
इति भावप्रकाशः ॥ * ॥
( यथा च ।
"गुरूष्णस्निग्धमधुराः स्वरवर्णबलप्रदाः ।
बृंहणाः शुक्रलाश्चोक्ता हंसा मारुतनाशनाः ॥"
इति चरके सूत्रस्थाने २७ अध्याये ॥ )
अस्या डिम्बगुणाः हंसबीजशब्दे द्रष्टव्याः ॥ * ॥
तस्य शकुनं यथा,—
"काष्ठासु सर्व्वास्वपि दर्शनेन
हंसस्य शब्देन तु सर्व्वसिद्धिः ।
नामानि हंसस्य शृणोति यस्तु
प्रयान्ति नाशं दुरितानि तस्य ॥
चौरैः समं दर्शनमाद्यशब्दे
निधिर्द्वितीयेऽथ भयं तृतीये ।
युद्धं चतुर्थे नृपतिप्रसादः
स्यात् पञ्चमे हंसरवे नराणाम् ॥"
इति वसन्तराजशाकुने ८ वर्गः ॥
निर्लोभनृपः । विष्णुः । (यथा महाभारते । १२ । ४३ । ७ ।
"शुचिश्रवा हृषीकेशो घृतार्च्चिर्हंस उच्यसे ॥")
सूर्य्यः । (यथा, महाभारते । ३ । ३ । ६१ ।
"त्वं हंसः सविता भानुरंशुमाली वृषाकपिः ॥")
परमात्मा । मत्सरः । योगिभेदः । मन्त्रभेदः । शरीरस्थवायुविशेषः । तुरङ्गमप्रभेदः । इति मेदिनी ॥ ( गोविशेषः । यथा, बृहत्संहितायाम् । ६१ । १७ ।
"सितवर्णः पिङ्गाक्ष-
स्ताम्रविषाणेक्षणो महावक्त्रः ।
हंसो नाम शुभफलो
यूथस्य विवर्द्धनः प्रोक्तः ॥")
गुरुः । पर्व्वतः । इति शब्दरत्नावली ॥ शिवः । इत्यनेकार्थकोषः ॥ अग्रतः स्थितः । श्रेष्ठः । इति हेमचन्द्रः ॥ विशुद्धः । इत्यजयः ॥*॥
अथ हंसमन्त्रविवरणम् । अस्याजपागायत्री-मन्त्रस्य शिरसि हंसऋषये नमः । मुखे अव्यक्त-गायत्रीच्छन्दसे नमः । हृदि परमहंसदेवतायै नमः । लिङ्गे हं बीजाय नमः । आधारे सः शक्तये नमः । परमात्मप्रीतये उच्छ्वासनिश्वासाभ्यां षट्शताधिकैकविंशतिसहस्रजपेन पूर्व्वभूतेभ्यो निवेदयामि । मूलाधारमण्डपे स्वर्णवर्णे चतुर्द्दलपद्मे वादिसान्तचतुर्व्वर्णान्विते गायत्रीसहिताय गणनाथाय षट्शतसंख्यजपमहर्निशं समर्पयामि नमः । स्वाधिष्ठानमण्डपे अनेकविद्युन्निभे वादिलान्तषड्वर्णान्विते षड्दलपद्मे सावित्रीसहिताय ब्रह्मणे अजपामन्त्रषट्सहस्रं निवेदयामि नमः । मणिपूरमण्डपे नीलोत्पलमेघनिभे डादिफान्तदशवर्णान्विते दशदलपद्मे लक्ष्मीसहिताय विष्णवे षट्सहस्रजपं समर्पयामि नमः । अनाहतमण्डपे तरुणार्कनिभे द्वादशवर्णयुते द्वादशदलपद्मे गौरीसहिताय शिवाय अजपाषट्सहस्रजपं समर्पयामि नमः । विशुद्धमण्डपे षोड़शदलकर्णिकामध्ये जीवात्मने अकारादि-अःकारान्ते अजपासहस्रसंख्यजपं निवेदयामि नमः । आज्ञामण्डपे श्रीचन्द्रप्रभे द्विदलपद्मे ह-क्ष-वर्णान्विते मायासहितगुरुमूर्त्तये एकसहस्रजपं निवेदयामि नमः । ब्रह्मरन्ध्रमण्डपे नानावर्णोज्ज्वले सहस्रपद्मस्थिताय परमात्मने अकारादिक्षकारान्तसहिताय एकसहस्रजपं निवेदयामि नमः । सहस्रशब्दोऽसंख्यपर इति बोध्यम् । उक्तञ्च पद्मं कोटिसमन्वितमिति । इति जपं समर्प्य अष्टोत्तरशतसंख्यमजपाजपं कुर्य्यात् । अकारादिक्षकारान्ता वर्णा हंस इति शिवशक्तिबिन्दुना ब्रह्म च इति विसर्गरूपबिन्दुभ्यां हरिहरयोरभेदः । सोऽहमित्याभेदभावनया ब्रह्मरूपतां स्वं स्वं परिभाव्य उक्तः । षट्शताधिकैकविंशतिसहस्रजपेन परदेवतारूपः श्रीपरमेश्वरः प्रीयतामित्येकवारं सङ्कल्प्य ध्यायेत् ॥ * ॥ हंसस्य ध्यानं यथा,—
"आराधयामि मणिसन्निभमात्मलिङ्गं
मायापुरीहृदयपङ्कजसन्निविष्टम् ।
श्रद्धानदीविमलचित्तजलावगाहं
नित्यं समाधिकुसुमैरपुनर्भवाय ॥" * ॥
प्रसङ्गाज्जपरहस्यं लिख्यते । पञ्चाशद्वर्णसंपूटत्वेनानुलोम्यप्रातिलोम्येन ब्रह्मरूपं मेरु क्षकारं परिकल्प्य तया सह जपं कुर्य्यादिति दोषलेशैर्न बाध्यते । एतेन विश्वमेव हंसमात्रकयोरेकाकारेण कालात्मना लोके चिदात्म उच्यते । अजपाविधानं विना श्रीविद्यादिसकलविद्याया अनधिकारी भवेत् । तदुक्तम् ।
"हंसज्ञानविमुग्धेन कृतमप्यकृतं भवेत् ।" इति ।
"अजपाधारणं देवि ! कथयामि तवानघे ! ।
यस्य विज्ञानमात्रेण परं ब्रह्मैव देशिकः ॥
हसः पदं परेशानि प्रत्यहं प्रजपेन्नरः ।
मोहरन्ध्रं न जानाति मोक्षस्तस्य न विद्यते ॥
श्रीगुरोः कृपया देवि ! ज्ञायते जप्यते यदा ।
उच्छ्वासनिश्वासतया तदा बन्धक्षयो भवेत् ॥
उच्छ्वासे चैव निश्वासे हंस इत्यक्षरद्वयम् ।
तस्मात् प्राणस्तु हंसात्मा आत्माकारेण संस्थितः ।
नाभेरुच्छ्वासनिश्वासात् हृदयाग्रेर्व्यवस्थितः ॥"
इति राघवभट्टधृतदक्षिणामूर्त्तिसंहितायां ७ पटलः ॥ * ॥ अहोरात्रमध्येऽजपाजपसंख्या यथा,—
"षष्टिश्वासैर्भवेत् प्राणः षट्प्राणा नाड़िका मता ।
षष्टिनाड्या अहोरात्रं जपसंख्याक्रमो मतः ॥
एकविंशतिसाहस्रं षट्शताधिकमीश्वरि ।
जपते प्रत्यहं प्राणो सान्द्रानन्दमयीं पराम् ।
उत्पत्तिश्च जपारम्भो मृत्युस्तस्य निवेदनम् ॥"
इति तत्रैव ७ पटलः ॥ * ॥
अजपानामकारणमपि तत्रैव ।
"विना जपेन देवेशि ! जपो भवति मन्त्रिणः ।
अजपेयं ततः प्रोक्ता भवपाशनिकृन्तनी ॥
एवं जपं महेशानि प्रत्यहं विनिवेदयेत् ।